## पञ्चदशः पाठः

# कूटश्लोकाः

### कूटश्लोकौ

एकचक्षुः न काकोऽयं बिलमिच्छन्नपन्नगः।
क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः॥1॥

एकं चक्षुः अस्ति परन्तु काकः नास्ति, बिलम् अन्विष्यति परन्तु पन्नगः नास्ति, क्षयः भवति वृद्धिरपि भवति परन्तु समुद्रः नास्ति चन्द्रोऽपि नास्ति। तर्हि एतत् किम्?

कृष्णमुखी न मार्जारी द्विजिह्वा न च सर्पिणी।
पञ्चभर्त्री न पाञ्चाली यो जानाति स पण्डितः॥2॥

मुखभागः कृष्णवर्णः वर्तते किन्तु कृष्णवर्णा मार्जारी नास्ति, द्वे जिह्वे भवतः किन्तु सर्पिणी नास्ति, पञ्च पतयः सन्ति किन्तु पाञ्चाली नास्ति। तर्हि किम् अस्ति? यः जानाति सः पण्डित एव।

### कूटश्लोकः (प्रश्नोत्तरम्)

कं सञ्जघान कृष्णः का शीतलवाहिनी गङ्गा।
के दारपोषणरताः कं बलवन्तं न बाधते शीतम्॥3॥

| | | |
|---|---|---|
| कृष्णः कं जघान? | ............................. | कंसम् |
| शीतलवाहिनी का? | ............................ | काशीतलवाहिनी गङ्गा |
| दारपोषणरताः के? | ............................ | केदारपोषणरताः |
| शीतं कं न बाधते? | ............................ | कम्बलवन्तम् बलवन्तम् |

### सङ्ख्याकूटश्लोकः

एकोनाविंशतिः स्त्रीणां स्नानार्थं नर्मदां गताः विंशतिः।
पुनरायाता एको व्याघ्रेण भक्षितः।।4।।

स्त्रीणाम् एकोनाविंशतिः (19) स्नानार्थं नर्मदां गता व्याघ्रेण एको भक्षितः (19 – 1 = 18) विंशतिः (20) पुनरायाताः! ..................... ?

एकः ना स्त्रीणां विंशतिः (1 + 20 = 21) स्नानार्थं नर्मदां गताः। व्याघ्रेण एकः भक्षितः विंशतिः पुनः आयाता (21 – 1 = 20)

---

**उत्तरम्** — 1 सूची, 2 लेखनी

## समासकूटेन चमत्कारः

अहं च त्वं च राजेन्द्र लोकनाथावुभावपि।
बहुव्रीहिरहं राजन् षष्ठी तत्पुरुषो भवान्॥5॥

(एकः भिक्षुकः दरिद्रः / निर्धनः महाराजम् उद्दिश्य ब्रूते)

हे राजेन्द्र! अहं त्वं च उभौ अपि लोकनाथौ (स्वः) अहं बहुव्रीहिः भवान् षष्ठीतत्पुरुषः।

लोकः नाथः यस्य सः (भिक्षुकः) लोकस्य नाथः (राजा)।

द्वन्द्वो द्विगुरपि चाहं मद्गृहे नित्यम् अव्ययीभावः।
तत्पुरुष कर्मधारय येनाहं स्यां बहुव्रीहिः॥6॥

द्वन्द्व-द्विगु-अव्ययीभाव-तत्पुरुष-कर्मधारय-बहुव्रीहिसमासभेदान् आश्रित्य अत्र कूटश्लोके निर्धनस्य धनप्राप्त्यै पत्न्याः प्रार्थनायाः अद्भुतः सामाजिकः भावः निबद्धः। अत्र पत्नी धनार्जनाय अकर्मण्यं भर्तारं प्रेरयति।

(द्वन्द्वः- अहं भवता सह कलहं करोमि किल? किमर्थम्?

द्विगुः- अहं भवतः भार्या अस्मि। मम पालनं पोषणं भवतः कर्त्तव्यम् अस्ति किन्तु-
(मद्गृहे नित्यम्)

अव्ययीभावः- प्रतिदिनं गृहे भोजनार्थम् किमपि नास्ति।

तत्पुरुष अतः हे पतिदेव! कमपि उद्योगं कुरु।

कर्म+धारय धनधान्यादिकं गृहमानय येन कारणेन (येनाहं स्याम्)

बहुव्रीहिः- अहमपि धनधान्यसम्पन्ना भवेयम्।)

शङ्करं पतितं दृष्ट्वा पार्वती हर्षनिर्भरा।
रुरुदुः पन्नगाः सर्वे हा हा शङ्कर शङ्कर॥7॥

अत्रापि श्लेष द्वारा अर्थः बोध्यः। शङ्करं पतितं दृष्ट्वा पार्वती प्रसन्ना भवति, सर्वाः दुःखिताः जाताः। अत्र शङ्करशब्दे पार्वतीशब्दे च श्लेषः। सर्पाः शीतलं चन्दनवृक्षं आलिङ्ग्य मिलन्ति सः चन्दनवृक्षः प्रकृतिविकोपेन पतितः अतः निराश्रिताः पन्नगाः रुदन्ति तथा भिल्लस्त्री(मलयपर्वते) चन्दनवृक्षबाहुल्यात् चन्दनवृक्षकाष्ठम् इन्धनाय-उपयुक्ते।

भिल्लस्त्री(पार्वती) पतितं चन्दनवृक्षं दृष्टवा इन्धनं लब्धमिति हर्षनिर्भरा जाता।

शङ्करः- शिवः चन्दनवृक्षः च, पार्वतीः- गौरी भिल्लस्त्री च

कस्तूरी जायते कस्मात् को हन्ति करिणां कुलम्।
किं कुर्यात् कातरो युद्धे मृगात् सिंहः पलायनम्॥8॥

अत्र चरणत्रये त्रयः प्रश्नाः चतुर्थे चरणे त्रयाणाम् एव उत्तरं वर्तते। कस्तूरी कस्मात् जायते इति प्रथमः प्रश्नः 'करिणां कुलं कः हन्ति' इति द्वितीयः प्रश्नः कातरः युद्धे किं कुर्यात् इति तृतीयः प्रश्नः।

## शब्दार्थाः

| | | |
|---|---|---|
| चक्षुः | — | नेत्र |
| पन्नगः | — | सर्प |
| बिलम् | — | छेद |
| जिह्वा | — | जीभ |
| पञ्चभर्त्री | — | पाँच पतियों वाली |
| पाञ्चाली | — | द्रौपदी |
| जघान | — | मारा |
| शीतलवाहिनी | — | शीतल जल वाली |
| दारपोषणरताः | — | पत्नी के पोषण में तत्पर |
| केदारपोषणरताः | — | खेत सँवारने में संलग्न (कृषक) |
| कम्बलवन्तम् | — | किस बलवान् को |
| ना | — | पुरुषः/नरः |
| एकोनाविंशतिः | — | 19 |
| विंशतिः | — | 20 |
| लोकनाथः | — | भिक्षुक/राजा। बहुव्रीहिः। सर्वोऽपि लोकः भिक्षुकस्य नाथः लोकस्य नाथः। |
| लोकस्य नाथः | — | षष्ठीतत्पुरुषसमासे कृते राजा इत्यर्थः। |
| द्वन्द्वः | — | द्वन्द्व समास, कलह |
| द्विगुः | — | द्विगुसमास, दम्पति (पति-पत्नी) |
| अव्ययीभाव | — | समास, धनाभाव (निर्धनता) |
| तत्पुरुषः | — | समास, पति |
| कर्मधारय | — | समास, अकर्मण्यता छोड़कर कर्म करो। |
| बहुव्रीहिः | — | समास, धनधान्ययुक्त |
| शङ्करम् | — | शङ्कर भगवान को/ चन्दन के पेड़ को |
| पतितम् | — | गिरते हुए |
| पार्वती | — | पार्वती शिवपत्नी/ पर्वतनिवासिनी भीलनी |
| कस्तूरी | — | कस्तूरी (गन्धविशेष) |
| जायते | — | उत्पन्न होती है। |
| हन्ति | — | मारता है |
| करिणां कुलम् | — | हाथियों के समूह को |
| कातरः | — | दुःखी |
| युद्धे | — | युद्ध में |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत—**

   क. प्रथमायाः प्रहेलिकायाः उत्तरं किम्?
   ख. वयं कया लिखामः?
   ग. कंसं कः सञ्जघान?
   घ. कम्बलवन्तं किं न बाधते?
   ङ. कति स्त्रियः स्नानार्थं नर्मदां गताः?
   च. करिणां कुलं को हन्ति?

**2. एकवाक्येन उत्तरं लिखत—**

क. लेखन्याः स्वरूपं किम्?
ख. सूच्याः किं लक्षणम्?
ग. काशीतलवाहिनी का?
घ. शीतं कं न बाधते?
ङ. नर्मदायाः कति स्त्रियः पुनरायाताः?
च. शङ्करं पतितं दृष्ट्वा पार्वती कीदृशी भवति?

**3. युग्ममेलनं कुरुत—**

| | (अ) | (ब) |
|---|---|---|
| क. | कंसं जघान | भिक्षुकः |
| ख. | शीतलवाहिनी | राजा |
| ग. | लोकः नाथः यस्य सः | कृष्णः |
| घ. | कातरः युद्धे कुर्यात् | मृगात् |
| ङ. | लोकस्य नाथः | कम्बलवन्तम् |
| च. | शीतं न बाधते | गङ्गा |
| छ. | कस्तूरी कस्मात् जायते | पलायनम् |

**4. रिक्तस्थानानि पूरयत—**

क. कंसं जघान ........................।
ख. कं बलवन्तं ...................... शीतम्।
ग. तत्पुरुष ...................... येनाहं स्यां बहुव्रीहिः।
घ. ............... पतितं दृष्ट्वा पन्नगाः रुरुदुः।
ङ. मद्गेहे नित्यम् ..................।

**5. द्व्यर्थकशब्दानाम् अर्थं लिखत—**

| | शब्दः | अर्थः |
|---|---|---|
| क. | शङ्करम् | .................. |
| ख. | द्वन्द्वः | .................. |
| ग. | बहुव्रीहिः | .................... |
| घ. | कं बलवन्तम् | .................. |
| ङ. | लोकनाथः | .................. |
| च. | अव्ययीभावः | .................. |
| छ. | द्विगुः | .................. |
| ज. | कर्मधारय | ..................... |
| झ. | एको ना विंशतिः | ..................... |
| ञ. | पञ्चभर्त्री | ...................... |

**योग्यताविस्तारः —**

- एवमेव अन्यान् कूटश्लोकान् प्रहेलिकाः च अन्वेषयत।

*कूटोक्तिः वाग्वैचित्र्यम्।*